# संस्कृतवार्ताः

**दिनाङ्क :- 27.05.2025** **प्रात: - 06:55**

**अथ वार्ताः**

**प्रधानमन्त्री-गुजरात**

प्रधानमन्त्री श्रीनरेन्द्रमोदी अद्य गुजरातस्य गान्धीनगरे महात्मामन्दिरे षट्त्रिंशत् उत्तर पञ्चशताधिक पञ्चसहस्त्र कोटी रूप्यकाणां विकासात्मकपरियोजनानां उद्घाटनं शिलान्यासं च विधास्यति। असौ गुजरात-नगर-विकासस्य विंशतितमे वार्षिकोत्सवे भागं गृह्णियात्। कार्यक्रमोऽयं पञ्चोत्तरद्विसहस्रतमवर्षस्य नगरीय विकास वर्षस्य आरम्भस्य दशकद्वयानां समाप्तिं सूचयति। अस्योद्देश्यं योजनाबद्ध-आधारभूत-संरचना, उत्तम प्रशासनं, नगरीय-निवासिनां कृते उत्तम-जीवनस्तरस्य निर्माणं च वर्तते। एतद् सर्वमपि सुनिश्चेतुं प्रधानमन्त्री गुजराते नगरप्रगतये अपूर्व रूपरेखाया: शुभारम्भं कुर्यात्। अनेन पञ्चविंशत्युत्तरद्विसहस्रतम वर्षस्य विकास वर्षस्य शुभारम्भो भविता। श्री मोदी नगर विकास-स्वास्थ्य-जलापूर्तिसम्बद्धानां कतिपय परियोजनानामपि उद्घाटनं करिष्यति, शिलान्यासं च स्थापयिष्यति। असौ प्रधानमन्त्री आवासयोजनाया: अन्तर्गतं द्वाविंशतिसहस्रलाभार्थिभ्य: आवासं च समर्पयेत्।

**राष्ट्रपति: पद्मपुरस्कार**

राष्ट्रपति: द्रौपदीमुर्मु: अद्य राष्ट्रपति: भवने द्वितीय नागरिक अलंकरण समारोहे पद्मपुरस्कारं प्रदास्यति। अवधेयास्पदं वर्तते यत् देशस्य सर्वोच्चनागरिक पुरस्कारेषु एकं पद्मपुरस्कारं त्रिषु स्तरेषु प्रदीयते-प्रथम: तावत् पद्म-विभूषणपुरस्कार:, द्वितीय: पद्मभूषणपुरस्कार:, तृतीय: पद्मश्रीपुरस्कार: वर्तते। पुरस्कारोऽयं कला, सामाजिक कार्य, विज्ञान, व्यापार, उद्योग, चिकित्सा, साहित्य, शिक्षा, क्रीडा इत्यादिषु क्षेत्रेषु प्रदीयते।

**पीएम-दाहोदः**

प्रधानमन्त्री नरेन्द्रमोदी ह्य: उक्तवान् यत् एक दशमलव चत्वारि अरब भारतीयाः एकीभूताः सन्ति, विकसितभारतस्य निर्माणे अथक-कार्यं कुर्वन्ति। आत्मनिर्भरतायाः उपरि बलं प्रददता श्रीमोदिना उक्तं यत् भारतं विकसितराष्ट्रं कर्तुं यत्किमपि आवश्यकं तत् सर्वं, देशेव निर्मितं भवेत् इति आवश्यकम् अस्ति। गुजरातस्य दाहोद-नगरे प्रायः चतुर्विंशति-सहस्र-कोटिरूप्यकाणां बहुविधविकासपरियोजनानां आधारशिलास्थापनं उद्घाटनं च कृत्वा श्रीमोदिना इदं उक्तम्।

आन्तारिकनिर्माणस्य वृद्धिं उद्धृत्य सः उक्तवान् यत् भारते निर्मिताः रेलमार्गघटकाः अधुना इङ्ग्लैण्ड्, फ्रान्स्, मेक्सिको, जर्मनी इत्यादिषु देशेषु निर्यातिताः भवन्ति। सः सूक्ष्म-लघु-मध्यमोद्यम -संस्थानां, यूनां च प्रशंसाम् अकरोत् यत् ते वृद्धिं अग्रे सारयन्ति। सिन्दूराभियानस्य विषये प्रवदन् प्रधानमन्त्री मोदी अवदत् यत् एतत् केवलं सैन्यकार्यं न, अपितु भारतीयमूल्यानां भावानां च अभिव्यक्तिः अस्ति।

श्रीमोदिना राज्यसर्वकारस्य रेलादिक्षेत्रसम्बद्धाः विविधाः विकासपरियोजनाः अपि प्रारब्धाः। एतेषु, वेरावल-अहमदाबाद-योः मध्ये वन्दे-भारत-एक्सप्रेस्-रेलयानानि, वालसाड्-दहोड्-स्थानकयोः मध्ये एक्स्प्रेस्-रेलयानानि च सन्ति । प्रधानमन्त्रित्वेन शपथग्रहणस्य एकादश वर्षाणि पूर्णानि कृत्वा श्रीमोदी गुजरातेन, राष्ट्रेण च तस्य उपरि स्थापितस्य विश्वासस्य स्मरणं कृतवान्। ततः पूर्वं प्रधानमन्त्री मोदी दहोद-नगरे भारतीयरेलवे-इत्यस्य लोकोमोटिव-निर्माण-संयंत्रस्य उद्घाटनं कृतवान्।

**राजनाथ-समीक्षा**

रक्षामन्त्री राजनाथसिंहेन ह्य: नवदिल्ल्यां अष्ट डी.पी.एस.यू. इत्यस्य प्रदर्शनस्य समीक्षा विहिता। उपवेशनावधौ, मन्त्रिणा सिन्दूराभियानावधौ भारतीय सशस्त्र बलानां प्रदर्शनस्य प्रसन्नता च विहिता।

**॥ इति वार्ता:॥**